गतः धात्री का भूः भूमिः कीदृग्वधूः हहसति मैथुनं वांछति इपरा कामपरा कविः क आदृतः गवि
वाणां अर्थः राजंस्त्वं भवता त्वया रिपुकुलं किं हतं जितं धाम्यया वायुसमूहेन सरः कीदृक् पक्षे वि
कचा विकसिता या वारिजराजिः सरोजपंक्तिस्तस्याः समुद्भवो जन्म यस्य तथोक्तो यउच्छलितइतस्ततश्च
लितो भूमिपरागः प्रचुररेणुस्तेन विराजितं शोभितं खं डोकरजातिः ॥ २९ ॥ बिभर्ति वदनेन किं कहरः
सत्वपीडाकरं कुलं भवति कीदृशं गलितयौवनं योषितां बभार हरिरंबुधेरुपरि कां च केन सुतो

धिव
२८

हृतः कथय कस्त्वया नगपतेर्भयं कीदृशात् २० विषमपादनिकुंजगताहितः इह को वदनेन मु
खेन सत्वपीडाकरं प्राणिदुःखकरं किं बिभर्ति विषमपात् अपात् सर्पो विषं योषितां कुलं गलितयौवनं
सत् कीदृक् अनिः इह कामो न विद्यते यत्र तत् अरिः कामं बुधे रूपाभिभार कुंभुवं च पुनः केन हृतः जग
ताल्लोकेन त्वया को हृतः कथय अहितः शत्रुः कीदृशान्नगपतेर्भयम् पक्षे विषमा ये पादाग्रं तत्पर्व
तास्तेषु ये निकुंजाः लतादि पिहितोदराः प्रदेशाः तेषु गताः प्राप्ताः अहयः सर्पा यस्य सः विषमपादनिकुं
जगताहितस्तस्मात् सार्वविभक्तिकमिदम् २० हरिर्वहति कां तव अस्ति रिपुका गता कं च काकमर्च
यति रोगवान् वनपतीपुरी कीदृशी हरिः कमधरद्बलिप्रभृतयो धरां किं अधुः कयास दसि कस्त्वया बु
धजितो बुधैः कीदृशः २१ कुंभीरमीनमकरागमदुर्गवारिः पादोत्तरजातिः हरिः कां वहति
कुं पृथ्वीं तव अरिपुका अस्ति भीः भयं का अंगता अर्थ ई श्रीः ई लक्ष्मीः रोगवान् कमर्चयति इनं सूर्यम्
तथा चोक्तं ईश्वरात् ज्ञानमन्विच्छेन्मोक्षमिच्छेज्जनार्दनात् आरोग्यं भास्करादिच्छेद्धनमिच्छे

विपु.टी.
२९

कुताशनात् कीदृशीपुरीधनवती अकरा कररहिता हरिःकमधरत् अगं बलिप्रभृतयोराजा
नोधरांदधौ किंमधुच्छकः अस्तुःअतीर्मुःदत्तवंतङ्कमर्थः सदसिसभायांकयाकेजिताःगवावारापाऽ
रिविपक्षः अंबुधिःसमुद्रःकीदृशोभवति पक्षे कुंभीरोनक्रःमीनोमत्स्यः मकरोमगरस्तेषामागमेन
दुर्गममगम्यंवारिजलंयस्मिन्सःपादोनरजातिः ११ वर्णैर्व्यस्तैराशिपादाभ्यांनेमिपादद्वयेनच
लिखित्वाद्भिरगावर्तेःचक्रप्रश्नमवेहिमे १२ चत्वारिअराशिकंटकानि
लिखित्वामेममचक्रप्रश्नमवेहिजानीहि चक्रंरथांथनेमिःसीमरः १२
कंचोरस्यछिन्नंक्षितिपतिरनघःकिंपदंवक्तिकुत्संक्षोरासंवोधनंकिं
वदतिकमलभूःकाचविश्वंविभर्ति चक्रांगामंत्रशार्किं कथममपिसुजनः
किंनकुर्यादनर्थंकीदृग्भोक्तुःपुरस्मात्स्यसिवदकुतोमीनपंक्तिर्बिभेति १३
किंस्वछंशारदंस्याद्वदतितृषार्तःकोंशुमालीपवित्रःकोस्मिन्किंजीवनंका




शिव
२९

विरचयति कविर्यत्रिसंबोधनं किं नाकौकसां तिस्त्रियः कं तनुरसुरारिपोः कीदृशी काश्वमूकः सम्यक्
प्रीतिं तडागः प्रियतमतनुते कीदृशः कीदृशास्ते २४ करंकुकोककुररकलहंसकरंबितः सरोजकोम
लोद्गारनीरसंसक्तमारुतः २५ चक्रबन्धजातिः कं चौरस्पृशति किं स्वच्छतिमिकरकौमिति एतस्य श्लो
कस्य पूर्वार्द्धेन वत्सार्थ्यराशिर्भवति उत्तरार्द्धेन नेमिर्भवति अनघो निःपापः क्षितीशो राजा चौरस्य कं
छिनत्ति करं हस्तं किं पदं कुत्से वदति कु पादकुत्से कदर्थे कुइत्यमरः क्षोणीसंबोधनं किं को हेपृथ्वि
कमलभूर्ब्रह्मा वदति का विश्वं बिभर्ति हे क हे ब्रह्मन् कुः पृथ्वी चक्रांगामेत्रणां किं स्यात् हे अर हे कं
टक सुजनः कथमपि किं कार्यं न कुर्यात् कलहं विवादं भो कुन्नृपतेः पुरं नगरं कीदृक् स्यात् सकरं
कारसहितं वद मीनपंक्तिः पयसि जले कुतो बिभेति वितः पक्षिणोर्थात् बकादेः शारदं शरत्कालीनं किं
स्वच्छं स्यात्सरः कासारः हयपतिर्महेशो वदति अंशुमाली कः हे अज हे शंभो कः सूर्यः पवित्रः कः
अमलः निर्मलः अस्मिन् विश्वे किं जीवनं अत्र अदनं भक्षणमित्यर्थः कविः का विचारयति गावा

धि·स्तु·टी
३०
30

गी· वह्निसंबोधनं किं र हे अग्ने रक्षकामेन लेवज्ञे इत्येकाक्षर्ध्या स्त्रियः कं नाकांक्षंति नीरसे रसाः भृं
गादयस्त इहिते नीरागमित्यर्थः अक्षरादियो विश्वोऽस्तनुभूतिः कीदृशी सक्रमा सक्रासंलग्ना मालक्ष्मीर्ये
स्यांसा मूकः कः अरुतः शब्दरहितः हे प्रियतम कीदृशास्तडागाः सम्यकृयथेष्टं ते तव प्रीतिं तनुते विस्तारयति·
पक्षे कारंकुः करीकुलीति प्रसिद्धः पक्षिविशेषः अथवा कं जलं तत्र रंकुर्गलमृगा इत्यर्थः कोकश्चक्रवाकः
कुररः क्रोशोलेजे पक्षिविशेषः कलहंसः सारहंस इति प्रसिद्धः तैः कारंविनोयुक्तः पुनः सरोजानां कमलानां को
मलो मनोहरो यश्चक्रारो विकाशस्तद्युक्तं पन्नीरं तेन संसक्तो मिलितो मारुतः पवनो यत्र सः चक्रजातिः १३

द्वय १४ १५ वर्णाद्वयैकैकदलभूतदलाष्टकं सर्वोत्तराद्यवर्णेन पद्मं
स्यात्कृतकर्णिकं १६ एवंविधं पद्मं स्यात् वर्णद्वयेन विशिष्टं एकैक शिव ३०
मक्षरं दलभूतं मध्यप्राणं यत्र तत् दलानां पत्राणां अष्टकं यत्र तत् सर्वे
षामुत्तराणां माद्यवर्णेन प्रथमाक्षरेण मध्यस्थेन कर्णिकायुक्ता सर्वेषा



पूर्वश्लोकः विपर्य्ययेणालिखितोस्तीति ज्ञातमस्ति

मंदिमाक्षराभ्यां सर्वपत्राणि यथाक्रमं संभवति ४६ अप्यन्नं वद कीदृशं निगदितो मुक्तः पुमान्कीदृशः क
स्माद्बिभ्यति कौशिका भुवि स्तुतः कीदृक्कलया तस्करः हस्तीस्यान्ननु कीदृशो बहुमतः को घोरणाः कीदृशाः कीदृक्
पुरुषः पराप्रतिहतः कीदृग्भवेद्वासुकिः ४७ पुंराणात्मा वद कीदृशाः सरसिजैः केमोदिताः कीदृशास्त्वद्वैरी
गतचक्षुषः कुलमभूत्कीदृक्कयाकेजिताः वक्त्रालिः सलिलाशय कथय भोः कीदृक्कमाक्षेपवाक्शब्दः कु
त्र नतस्करादिकभयं दन्ते भवेत्प्रायशः ४८ अलयः अपथ्यत अरयः अरेरे अवंधः अहतः अगजः
अहीनः पद्मजातिः पुराणास्मेति अप्यतमिति पुराणात्मा सुकृती कीदृशाः वद अलयः अः लक्ष्मस्तत्र
लयो लीनता यस्य सः यान्तविद्यते लयो नाशो यस्य सः सरसिजैः कमलैः मोदिताके पक्षे अलयो भ्रमराः त्व
द्वैरी कीदृशाः अपथ्यत शायनथीः अदनं अत अपगते भपती शायनभोजने यस्मात्सः गतचक्षुषामंधानां
कुलं समूहं कीदृक् पक्षे अरयः नास्ति रयो वेगो यत्र सः आक्षेपवान् शब्दः कः अरेरे एतत्साक्षेपवचनं कु
त्र कस्मिन्दन्ते सति प्रायशस्तस्करादिभयं न भवेत् पक्षे अररे कपाटे कपाटमरं तुल्ये इत्यमरः अप्यन्नं वद
कीदृशं वद अवंधः अपोजलानि अंधोन्नं यस्य तत् मुक्तः पुमान्कीदृशो निगदितः पक्षे अवंधः वंधरहितः

कौशिकाउलूकाः कस्माद्दिम्यतिभयंप्राप्नुवंति अहस्तः दिवसात् त्वयातस्करश्चौरः कीदृक्कुतः पक्षेअहस्तः हस्त
रहितः ननुहस्तीकीदृशोवद्भुमतःस्यात् अगजः पर्वतजः कीदृशोरागःयोन्यः अगजःहस्तिभिन्नः कीदृक्षः पुरु
षःपराघनिहतः सपत्नानभिभूतः अहीनः वासुकिः सर्पः कीदृग्भवेत् पक्षे अहीनः अहयःसर्पास्तेषामि
नःप्रभुः पद्मजातिः ७ १८ काकस्येवपदंअसंस्यतत्काकपदंमतं तीर्य्यग
मोन्यरेखाभिर्गोमूत्रीद्विपदीद्वये १९ काकस्यपदमिवयतअसंत्रिकोणांतका
कपदंमतं द्विपदीद्वयोतीर्य्यगन्मोन्यरेखाभिर्गोमूत्री कुतःकःस्यात्कीदृक्कुधययवि
विषवैद्यस्फुट
मिदंरिपोःकः

कीदृक्षोभवतिवद्यागः कश्चकलभः प्रवीणःसंयोध्यःसुभगवदकौरत्नयचनौसुरूपेतिस्यातिंज
गतिमहतींकागतवती २० नागदरतः नागतनयः नागरमणी काकपदजातिः हेविषवैद्य रू
दस्फुटंकथय कुतःकस्मात्कःकीदृक्कस्मात् नागदरतः सर्पभयात् नापुरुषः अगादरतः औषधरत

शिव
३१

रिपूणां वशगः कः कीदृग्भवति नागतनयः नापुरुषो गतनयः मायरहितः कलभः कः उच्यते नाग
तनयः गजशिशुः प्रवीणाः संबोध्यः नागर हे चतुर हे सुंदर वद रत्नवचनौको रत्नं मणिर्द्वयोरस्मजा
तोस्तु क्लीबे प्यादिके पि वेश्ममरः सुरूपा सुंदरी स्त्रीमहतीं ख्यातिं जगति का गतवती प्राप्ता नागरमणी नागां
गना काकपदजातिः १८ कामाहुर्युवतीमनंगलवतीं कीदृग्ग्रहाणां गतिः संबोध्यावद मत्स्य वं
धनधरः कीदृग्भवेत्सामरः कीदृग्वाल्मीकिवेश्म कोस्तनमुरोधन्ने सुरैरुच्यते गीः कीदृग्न कदापि
शंखरहितं वांछंति कं योषितः १९ कीदृग्पापकुलं तमो हरति का किं चक्रसंबोधनं रम्या चंपककाशा
खिनः कथय काकपदात् जन्मं भवे किं क्षिप्तं बलिवैरिणा मुरारिपोः काम्यशानेति का क्ष्मा कीदृग्भ

अ रा शु चा च री घि दि
नै भर भार दूर लिय लं नी ० ताय
स्व ग नि सा क त्का ज ० स्त्रि

वति रम्यपूर्वमधुना कीदृक्पुनर्वर्तते २०
अजरामरशुभाचार
वलिशीलविनोदिता

भुजंगमगमनि भासारकलिकालजनोचिता २१ इतिगोमूत्रिकाजातिः कामांकुरिति कीदृशीति
वि॰मु॰टी युवतींतरुणींकामांकुर्वंदति अजरां जरारहितां चिरसाजरेत्यमरः अमंगलवतीअकल्याणीकीदृक् अ
शुभा शुभरहिता ग्रहाणांगतिः संबोध्या हेवार ज्योतिःशास्त्रेग्रहाणांगतिश्चार इतिकथयंति चारोग्रहग
३ तिःप्रसिद्धा अतएवविपरीतगतौअतीचारप्रयोगः वद मत्स्यवेधनरतः पामरोनीचः कीदृग्भवेत् वलि
शीः वलिशम स्यादस्तीति वलिशंमत्स्यवेधनमित्यमरः वाल्मीकिवेश्मकीदृक् लधि लवः सीतासुतोय
त्रतत्र गृहं गेहोदवसितं वेश्मसद्मनिकेतनमित्यमरः। कौस्तुभमुरो वक्षस्थलंयस्य नापुरुषः सुरैर्देवैः
कीदृक्गीरुच्यते उदिताउदयंप्राप्ता गीर्वाग्वाणीसरस्वतीत्यमरः योधितः कंकदापिपंखरहितंनवा
दंतीति भुजंगवाकुं स्त्रीयोषिदबलायोषानारीसीमंतिनीवधूरित्यमरः स्वरवोनियोललाटास्थिकंचो
नस्त्रीत्यमरः पंथकुलंपथिसमूहः कीदृक् गमनि गमनंविद्यतेयस्यतत् कांतमोहरति भादी शिव
प्तिः स्युःप्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयः इत्यमरः चक्रसंबोधनंकिंस्यात् सार अरेः स ३२
हवर्तमानंसारं तत्संबुद्धौहेसार चंपकशाखिनोरम्याकास्ति कलिका कलिकाकोरकः पुमानित्यम

रः कथय आरुजर्थेकोभवेत् आत्तआसयः आत्तजातैर्वसु भाषिणीति मुरवैरिणाश्रीलक्ष्मेनकिं
क्षिप्तं अनः शाकटं मुरारिपोराकृाका अहेतृश्रीलक्ष्म आस्याङ्कु अभिधानंचनामधेयंचनामचेत्यमरः श्म
शानेकाष्ठिचिता श्मशानंस्यात्पितृवनमित्यमरः चिताचित्याचितिः स्त्रियामित्यमरः क्ष्माभूमिः पूर्वं
कीदृशाभवतिस्म अभवदित्यर्थः स्मशब्दोऽतीतार्थवाचकः पुनरमुनाकीदृग्वतेते पक्षे अजश्चरामश्च
अजरामौशुभानियानि आचारवलिशीलानितैर्विनोदिता आचारः सत्कर्म वलिर्देवपूजाद्योभागः
शीलः स्वभावः पुनः भुजंगनिभश्वासावसारकालिकाचैलजनश्च भुजंगमनिभासारकलिकालज
नस्तस्योचितावा भुजंगमनिभः सर्पसदृशश्वासारः आशायेयेषांतथाभूतायेकलिकालजना[redacted]ः क
लियुगलोकास्तेषामुचितायोग्येत्यर्थः गोमूत्रिकायामेतदेवकौशलं यस्मिन्स्थानेयदेवाक्षरंप्रथम
चरणेतस्मिन्स्थानेतदेवाक्षरंभवतितृतीयचरणे एवमन्ययोश्चरणे अन्यथासर्वदृष्टान्तोऽन्यैरेवासं
वंधः समानः गोमूत्रिकाजातिः २३ वर्णैनैकेनबद्धाभ्यांसर्वैर्वासर्वदिग्गतैः उत्तरंसर्वतोभ
द्रं दुःष्करंतदिदंयथा २४ एकेनवर्णेनाक्षरेणाद्वाभ्यांवासर्वदिग्गतैः सर्वैर्वाउत्तरैः सर्वतोभद्र

वि·मु·टी
३३
33

मुच्यतेयथा २४ कस्मागेधातुरुक्तस्तवरिपुहृदिकाम्भूषणांकेस्तनानांकोदुःखीकस्थमद्देवदति
वदमुखंकौरिपूख्यातवीर्य्यौश्रृंगारीकीदृशः कारणाशिरसिभयाडंगमाप्नोतिसेनाकेदानार्थाभिधा
यीशिरसिशिरसिकोयुध्यतः संप्रहस २५ कीदृक्कोपार्थिनीस्त्रीभवतिमदकरः प्रायशःकोदुराढ्यो
कस्मिन्नंदायतेसोनियतमुदुपतिःप्रेयसीकाम्बुरारे विख्यातोवाहनोकोदुहिरणमुरभिदोःकीदृगा
खेटकस्त्रीकीदृग्विघुदचिराभानैवासमितिगतभयाकेगतोकस्थधातुः २६ हारावी स्यागेधातुः
कः उक्तः श्रोहाकृतागे तवरिपुहृदिकास्ति आरा चर्मप्रभेदिका वी स्तनानांभूषणांकेहाराः मु
क्तावल्यः दुःखीकः हारावी हाइतिरावःशब्दोयस्यास्तीति कथाद्दः हा रा: मुखंशोवदतिवद हाः हा
विदशुकार्तिध्वितमरः ञ्रहेः सर्पस्यख्यातशत्रुःकौ वी पक्षिरौ केकिताक्ष्यौवित्यर्थः
कौरिपूख्यातवीर्य्याविविति पाठे वी इश्च उश्चवी हरस्मराविमर्थः श्रृंगारीकः हावी हावोस्यास्ती
ति कासेनारणाशिरसिभयाडंगमाप्नोति अवीहा अषुजनेषुइहायस्याःसा दुराढ्यप्रायशोमद

शिव
३३

करः कोभवति राःद्रवं असावुडुपतिश्चंद्रोनियतंनिश्चितंकस्मिन्मंदायतेमंदोभवति राहोग्रहवि
शेषे मुरारेः प्रेयसीवल्लभाका ईर्लक्ष्मीः दुहितासुरभिदोब्रह्मविष्णोर्वाहनोकोस्तः वी पक्षिणोग्र
तो हंस यंगरुडो आरेवटिकस्त्रीयाधयध्वः कीदृक् वीहा वयःपक्षिणास्तेमुईहायस्याःसा अविभाविघुतकी
दृक्नभवति वीहा विगताईहायस्याःसातथोक्तानभवति किंतुचेष्टायुक्तैवभवतीत्यर्थः वीरेतु
तरे इहीराजलंतद्विरतानभवति किंतुसजलाभवति समितियुद्धेगतभयानिर्भयाःवे वीराःशू
राः गतौकोधातुः वीगतिप्रभंजनयोः अोहाङ्गतौ सर्वतोभद्रजातिः २६ प्रतिलोमानुलोमा
भ्यामुत्तरेणागतागतं मध्यवर्णविलोपेनतच्चानेकप्रकारकाम् २७ प्रतिलोमोव्युत्क्रमः अनु
लोमोनुक्रमः ताभ्यामुत्तरेणगतागतंभवति तऊलागतंमध्यवर्णविलोपेन अनेकप्रकारकंव
हुविधमित्यर्थः २७ वदवल्लभसर्वत्रसाधुर्भवतिकीदृशाः गोविंदेनानसिक्षिप्तेनंदयेश्मनि
काभवौत २८ क्षीरनदी देवद्यभवद साधुःसर्वत्रकीदृशोभवति क्षादीनरक्षी क्षीनान्न
क्षीनाक्षी

चि.सु.टी
३४
34

परान्नरक्षयतीति गोविंदेनालसिशकरेक्षिन्नेसतिनंदवेश्मनिकाभवत् क्षीरनदी दुग्धतरंगिणी
२७ यत्नाद्निष्पन्नकायाद्यालेखकेमसिमञ्जिका घनांधकारेनिःशंकंमोदतेकेनवंधकी २८ ना
लिकेरजा लेखकेर्यत्नाद्निष्पन्नकामसिमञ्जिकामषीपात्रीयाद्या नालिकेरजा नालिकेरेजाता धनां
धकारेनिःशंकावंधकीस्वैरिणी केनमोदते जारकेलिना उपपतिक्रीडया २९ दुरस्तनाभ्यांरहितं विभ
र्तिकाः ब्रह्मपुराणमास्तेत्वरितंकिमध्ययम् कदोस्थमंभोरुहिकेनरज्यतेकिमत्रअपूर्णाकृतिसाधनंफलं ३०
भ्रमरसुरनरेंद्रैरुह्यतेकाशिरोभिः तनुरपिशुचिपक्षेकोतिविस्तारमेति वदतिकमलयोनिःसेव्यतेके
नपुष्पंमधुरमसरागम्रद्वीकाभवेत्कुसलस्य ३१ मालिकानालिका भ्रमरसुरन
रेंद्रैः शिरोभिकाउह्यते धार्य्यते मालिका मालेवमालिका शुचिपक्षेश्वु
क्लपटे तनुरपिकातिविस्तारमेतिप्राप्नोति पक्षे कालिमा सूक्ष्मत्वं कमलयो
निर्वदतिकेनसेव्यते हेकरेद्भसन् अलिनाभ्रमरेण मधुरमसरागम्रद्वीउ

	ना	
मा	लि	ना
	का	

शिव
३५

स्यलस्य कमल विशेषस्य का भवति पक्षे नालिका अधोवर्तिदंडः ३१ हिमांशुरखंडं कुटिलो ज्वप्रभं
भवेद्वरारूप्रवरस्य कीदृशं विहाय वर्णांघ्रदमध्यसंस्थितं न किं करोत्येव जनः करोति किं ३२ दंष्ट्रा
भम् कुटिला वक्रा वक्रभा यस्मात् तथाभूतं हिमांशुरखंडं वराहरूप्रवरस्य शूकरश्रेष्ठस्य कीदृशं भवेत् दंष्ट्रा
भं दंष्ट्राय द्वाभा दीप्तिर्यस्य तत् दंतनुल्यमित्यर्थः पदमध्यसंस्थितं वर्णां विहाय सत्त्वा वदेति शेषः जिनो
बुद्धः किं न करोत्येव पक्षे दंभं पक्षे दंभं भंङ्गकरणपराणामित्यर्थः ३२ वसंतमासाद्य वनेषु कीदृशा
पिकेन राजेति रसालभूरुहः निरस्य वर्णाद्वयमत्र मध्यमं तव द्विषां कांत्यमतमातिथिश्च का ३३
कांतगिरा गतप्रत्यागतजातिः वनेषु रसालभूरुहः आम्रवृक्षाः वसंतमासाद्य प्राप्य कीदृशा पिके
न कोकिलेन राजंते शोभंते कांतगिरा मनोहरवचनेन वर्णाद्वयमध्यसंस्थितं निरस्य त्यक्त्वा वदेति शे
षः तव द्विषां का कारा वंदिशाला अंत्यतमातिथिः कास्ति राका पूर्णा चंद्रा पूर्णमासी गतप्रत्यागत
जातिः ३३ आदौ मध्ये तथांते वा वर्द्धंते वर्णा ज्ञातयः एकद्वित्र्यादयो यत्र वर्द्धमानाक्षरं हि तत् ३४ विद
आदौ मध्ये तथा अंते वा यत्र द्वित्र्यादयो वर्णा जातयो वर्द्धंते तद्वर्द्धमानाक्षरमिति ज्ञेयम् हीतिपादपूरं

वि·मु·टी ३६ 36 रो ३४ किमनंततयाख्यातं पादेनांगमाकृष्य जनानां लोचनानंदं केतन्वंति घनात्यये ३५ खं
जनाः अनंततयाकिमाख्यातं खंनभः पादेनांगमाकृष्य हेखंजनबोडे खंजः सादिस्मरः घनात्यये
शारदिके जगतो लोचनानंदं तन्वंति विस्तारयंति पक्षे खंजनाः खंजरीटाः ३५ उरस्थले कोत्र विना
पयोधरं बिभर्ति संबोधयमाहृताशनं वदंति किंपन्नसंभवं जनाः फलं च किं गौरवशुद्धरोपमं ३६
नागरंगम् अत्र पयोधरं स्तनं विना कः उरस्थलं बिभर्ति ना पुरुषः मारुताशनं द्विजिह्वमाकृष्य हे नाग
जनाः पन्नसंभवं देशजातं कं वदंति नागरं गौरवधाउदरोपमं जठराभं किं फलमस्ति पक्षे नागरं
गं फलविशेषः ३६ प्रायेणानीचलोकस्य कः करोतीह गर्वितां आद्यो वर्णद्वयं दत्वा ब्रूहि के वनवासि
नः ३७ शवराः इह कः प्रायेणातिशयेन नीचलोकस्य गर्वितां करोति राः द्रव्यं आद्यो वर्णद्वयं दत्वा शिव
ब्रूहि वनवासिनः के भवंति शवराः पुलिंदाः ३७ सानुजः काननं गत्वा नैषके यान् जघान कः म ३६
ध्ये वर्णत्रयं दत्वा रावणाः कीदृशो वद ३८ राक्षसोत्तमः सानुजः कः काननं गत्वा नैषके यान् निर्ऋ
त्या पुत्रान् राक्षसान् जघान हतवान् रामः रामचंद्रः मध्ये वर्णत्रयं दत्वा वद रावणः कीदृशो भव

ति पक्षे राक्षसोऽन्नमः ३८ भत्नेवियोगिनीगंडस्थलपांडूफलानिका वदवर्णौविधायांते सीताद्द्या
भयत्कया ३९ लवलीलया कावियोगिन्यायुवत्या गंडस्थलवत्पांडूनिफलानिधत्ते लवली लतावि
शेषः ४० अंतेवर्णौविधायवद सीताद्द्याकयाः भवत् लवलीलया लवः पुत्रस्तस्यलीलया क्रीडया ३९
विष्णोः कावल्लभादेवी लोकत्रितयभाविनी वर्णमाद्यंतयोर्दत्वा कः शब्दस्तुल्यवाग्वद ४० समानः
वर्द्धमानाक्षरजातिः लोकत्रितयंत्रैलोक्यं लोकत्रयंपुनातीतिकादेवी विष्णोर्वल्लभाप्रिया मालक्ष्मीः
आद्यंतयोर्वर्णौदत्वावद कः शब्दस्तुल्यवाक्साधारणवाचीसमानः वर्द्धमानाक्षरजातिः ४० आदि
तोमध्यतोंताद्वाहीयंतेवर्णाजातयः एकद्व्यादयोयत्रहीयमानाक्षरंहितत् ५१ यत्रादितोम
ध्यतोंताद्वा एकद्व्यादयोवर्णाहीयंते हीयमानाक्षरंतदुच्यते ५१ वसंतमासाद्यविकाशिराजते
वनेषुकिंवल्लभपुष्पमुच्यतां विहंगमंकंविपरिस्फुटाक्षरं वदंतिकंपंकजसंभवं विदुः ५२
किंशुकं हेवल्लभउच्यतांत्वयावनेषुकिंपुष्पं वसंतमासाद्यविकाशिप्रभुत्वं सद्राजते शोभते कि

शुकं पलाशकुसुमं जनाः कंविहंगमंपक्षिणांपरिस्फुटाक्षरंवदंति पक्षे शुकं कीरं पंकजसंभवंकं
वदेति पक्षे कंब्रह्माणं ७२ समुद्यतेकुत्रनयातिपांशुलासमुद्यतेकुत्रभयंभवेज्जलात् समुद्य
तेकुत्रतवाप्रियात्मारिःप्रहीनसंबोधनवाचिकिंपदं ७३ हिमकरे कुत्रकस्मिन्समुद्यतेसतिपां
शुलाकुलटानयाति हिमकरे चंद्रे कुत्रसमुत्पन्नघ्नेसतिजलाद्भयंभवेत् मकरे तवकुत्रसमुत्पद्यते
सति अरिःशत्रुःप्रयातिपलायते हरेहले किंपदंप्रहीणासंबोधनवाचि रे ७३ तपस्विनोत्यंतम
हासुखाशयायावनेषुकस्मैस्पृहयंतिसत्तमाः इहापिवर्णद्वितयेनिरस्यभोः सत्वास्थितंकुत्रवसत्वमु
च्यतां ७४ तपसे सत्तमाःश्रितिसाधवस्तपस्विनोत्यंतमहासुखस्याशास्पृशातयावनेषुकस्मैस्पृ
हयंति तपसे तपश्चरणाय अत्यंतमहासुखेआशयोभिलाषोयेषांतेतत्प्रथमांतंपदंवातपस्विविशे
षणं कश्चित्कंचित्पृच्छते भोइहाद्यवर्णावर्णाद्वितयंनिरस्यौच्यतां सत्वंसकारभावः कुत्रस्थितः सेसका
रे ७४ पुरुषः कीदृशोविशिष्टायेणासकलाः कलाः मध्येवर्णाद्वयंमस्कात्कूहिकःस्यात्सुरालयः ७५

नागरिकः कीदृशः पुरुषः कसकलाः कलाभ्यायेणावेत्तिजानाति नागरिकः नगरोद्भवः चतुरस्तस्यैः
मध्यवर्णोद्भयेहित्वामस्तकावदन्त्रहि सुरालयः कः स्यात् नाकः स्वर्गः आकाशेत्रिदिवेनाकइत्यमरः ४३
सुगंधीति नितंविनीनांकामिनीनांसुगंधिशोभनगंधियस्य अर्पितंसीधुमद्यंतस्यदोहदानिकां
क्षाविशेषाः तेकेषिकाशिनोभवति केशरद्रुमाः बकुलवृक्षाः अंतसंभवान्अक्षरोवर्णान्विहाय
मस्तकावद शिरोरुहैः केशैः सदाकुत्रस्थितं केमस्तके ४४ यजमानेनकः स्वर्गहेतोः सम्यग्विधा
र्यते विसायाद्यंतयोर्वर्णौगोत्वंकुत्रस्थितंसदा ४५ यागविधिः हीयमानाक्षरज्ञातिः य
जमानेनस्वर्गहेतोः सम्यग्विधार्यते यागविधिः यज्ञः सवोध्वरोयागइत्यमरः आद्यंतयोर्वर्णौवि
हायवदः गोत्वंकुत्रस्थितं गवि पटेपटत्ववत् ४६ अन्योन्याक्षरवर्तिन्याएकांतरितयाथवा
शृंखलावंधयुक्तस्तुलोग्रधिमान्नागवंधकः ४७ अन्योन्यंपरस्परमक्षरेषुवर्तते इत्येवंशीलयाजातया
शृंखलावंधयुक्तः शृंखलायावंधः एवंबंधोरचनाविशेषः तथाएकांतरितयाग्रधिमाना नाग

विःसुःटी
३८

पाशकइति ४७ पवित्रमतिलध्विन्नस्त्विमिह किंमधामंत्रणां ब्रवीति धरणीधरश्च किमजीर्णसंबो
धनं हरिर्वदति कोजितो मदनवैरिणासंयुगे तनोति ननु कः शिखंडिकुलतांडवाडंबरं ४८ पयोध
रसमयः इहपवित्रेशुद्धमतिल्यध्विन्नस्त्विमसि पयः जलं दुग्धंवा पयःक्षीरांबुनेत्यमरः मधामंत्र
णांकिं पोय धरणीधरोगिरिर्ब्रवीति अजीर्णसंबोधनंकिं धरपर्वत हेरस लोकेअन्नरसःअसि
इइति हरिर्वदति मदनवैरिणाहरेणासंयोगे कोजितः हेसम मयालक्ष्मासहवर्ततइतिसमस्त
स्पसंबोधने मयोदेशः ननुनिश्चये कः शिखंडिकुलतांडवाडंबरं पयोधरसमयः ४८ भवतिवि मेघावसः
जयिनी काजोसेनाहूयाँयमभूषणांवसतिकिमहिः पुष्पंकीदृक्कुसुंभसमुद्भवं महतिसमरेवै
रीवीरत्वयावद किंलतः कमलमुकुले भृंगः कीदृक्किवन्मधुराजते ४९ परागरंजितः भृं १शाव
खलाजातिः आजौकासेनाविजयिनीजयपुक्ताभवति परा उत्कृष्टा | प | रा | ग | रं | जि | ता | ३८
अथयमभूषणां आहूय हेराग अहिः सर्पः किंवसति गरंविषं कुसुंभ
समुद्भवंपुष्पंकीदृक्कस्मात रंजितंजनशीलं रंजराग इत्यस्माद्धातोः हेवीरवद महतिसमरेत्व

पक्षे

यावैरीकिंस्तुतःजितः कीदृग्भृंगः कमलमुकुलेपद्मकुड्मलेमधुमकरंदंपिबन्सन्राजतेशोभते परा
गरंजितः रेणुलिप्तः परागःकौसुभेरेणावित्यमरः अम्भोम्भःक्षारंश्रेंखलाजातिः ४९ आक्रांतं
किंभवतिहितरोः कस्यचित्सर्वविज्ञाः प्रायःकार्यंकिमपिनकलौकुर्वतेकेपरेषां पूर्णोचंद्रंवह
तिननुकाप्यच्छतिम्लानवक्त्रः केनोदन्याजनितमसमंकष्टमाप्नोतिलोकः ५० नीरापकारेणाहे
भूप्सर्वविज्ञाः कस्यचित्तरोराक्रांतंकिंभवति क्षीतिपादपूर्णाः नीप हेकदंब कलौकेपरेषांकिमपिका
र्यंप्रायोसर्थंनकुर्वते परेशात्रव अम्भेवा चतुर्थेपियुगेकालिरित्यमरः वदकापूर्णांचंद्रंवहति रा
का पूर्णमासी पूर्णिमाकानिशाकरेइत्यमरः म्लानवक्त्रमेनेकनेत्रःपच्छति लोकः उदन्याजनितं
पिपासाभवमसमंविषमंकष्टंकेनाप्नोति हे कारणानीरापकारेण जलप्राप्तियेन ५० कासंबु
द्धिःशुभाभवतोब्रूहिपृच्छामिसम्यक्प्रातःकीदृग्भवति विपिनंसंप्रबुद्धेर्विहंगैः लोकःक
स्मिन्प्रथयतिमुदंकात्वदीयाजनित्रीप्रायोलोकेस्थितमिहसुखंजंतुनाकीदृशेन ५१ धीराद
सेविना एकांतरितसंखलाजातिः कश्चिद्वक्ति सम्यक्पृच्छाम्यहं हेसुभद्रब्रूहि भवतः संबुद्धिः

वि·मु·टी का हेवीर प्रातःप्रभातेसुप्रबुद्धैर्विहंगैर्विपिनंकीदृग्भवति रवि रवः शब्दोविघ्नतेयत्रतत् लोकःकस्मि
न्सतिमुदंप्रथयति हासे हास्यरसस्थायीभावे त्वदीयाजायत्रीकासेना इहलोकेकीदृशेनजंतुनासुखे
३९ यथासात्तथास्थितं पक्षे विहारसेविना देवालयसेविना एकांतरितंश्चखलाजानि: ५१ गोष्ठीविद
ग्धजनवत्यपिशोचनीयाकीदृग्भवेन्नरीणारश्मिषुकासदास्ति दुर्वारदर्पदलिताभरनायकापिकी
39 दृश्पकारिसुरशत्रुचमूर्गुहेयन ५२ तारकाविरहिता विदग्धजनवत्यपिचतुरजनयुक्तापिगोष्ठी
कीदृशीशोचनीयाभवेत् कविरहिता नरीणांरश्मिषुसूर्यकिरणेषुसदाकास्ति रविकरता गुहेन
स्वामिकार्तिकेयेन दुर्वारदर्पाद्दुर्निवारमदाद्दैत्यास्तेदलितास्ताडितोभरनायकइंद्रोययासातथाभू
तापिसुरशत्रुचमूर्दैत्यसेनाकीदृश्पकारि पक्षेतारकविरहिता तारकासुररहिता ५२ कीदृक्परै
रुपहतोभवतिक्षितीशः एछत्वनुचइह किं विदितंपवित्रं विछिन्नपाशिावरणोजनकोयदी शिव
यः कीदृक्परैरभिहतः सपुमान्पुनःस्यात ५३ अंगतनयः नागपाशजातिः कीदृक्क्षितीशः ३९
परैःशत्रुभिरभिहतोभवति गतनयः नष्टनीतिः अनुअपृछानि इहपवित्रंकिंविदितं हेनत

हेनीव गर्भं घृतादि: यदीयो जनक: पिता विच्छिन्नपाशिबरणो लूनहस्तपाद: स्यात्स पुन: पुमान्
परैः कीदृशाभिहितउक्त: अंगतनय: विगता अंगानि यस्य स अंगस्तस्य तनय: पुत्र इत्यर्थ: नाशपाशजा
ति: ५३ भाषाभिश्चित्रितं यस्मात्सं स्कृतप्राकृतादिभि: संतश्चित्रं तदिच्छंति स्रग्धुक्तं त्वेषभाष
या ५४ संस्कृतप्राकृतादिभिर्भाषाभिर्यच्चित्रितं स्यात्संतस्तच्चित्रमिच्छंति एकभाषया संयुक्तमित्य
र्थ: ५४ किं न स्यात्कीदृक्षं महतोपि वनात्तादृशात्स जलराशे: दिनमणिकिरणोंत्स राप ड्डिउजं
होइकिं गोसे ५५ कमलवणा तादृशस्य महतोपि जलराशे: समुद्रस्य किं कीदृक्षं न स्यात् कंज
लमलवणां लवणरहितं दिनमणिकरसुखस्पर्शनप्रतिबुद्धं किं भवति प्रत्यूषे पक्षे कमलवणां
कमलानां वनमित्यर्थ: ५५ मत्स्यहितमंबु कीदृक्पृच्छति रोगी निशासु किं भाति को नंगो वद
ति म्लेच्छा: एवं गम्भइके रिसाहिय्यसरविणा ५६ अविसामभमिरेणा कीदृगंबु मत्स्यहितं स्यात् अ
विनदि घंतेबय पक्षिणो यत्र तत् रोगी पृच्छति निशासु किं भाति हे साम आमो रोगस्तेन सह वर्तमान:
सामस्तस्य संबुद्धौ भं नक्षत्रं म्लेच्छो वदति अनंगो गहीन: कोस्ति एणा हे हरिणा ६ काम: कीदृ

मध्याह्नसमये ३ घनात्ययदिने ३

५० शोन रविराणस्वेगगनेगम्यते पक्षे अविसामभमिरेण अविश्राममभ्रमणशीलेन संस्कृतप्राकृतं ५६
जायो विभ्यति कीदृशाद्दिग्गजा दंतप्रहीणागजाः पृथ्वीपृच्छति कीदृशान्नृपतिनाराजन्वतीराजते
प्रायः प्रावृषि कीदृशी गिरितटी धत्ते च कः कं जले मज्जन्नेवबलिएवचशाखयदिनौजादंसरोकेरिसम
५७ सरदादवतोविदवाग्रिंर संस्कृतसौरसेनीकं दंतप्रहीणागजाः कीदृशात् अरिगजात् प्रायो वि
भ्यति सरदात्मदंतात् संप्रतीदानीं पृथ्वी कीदृशान्नृपतिनाराजन्वतीराजते शोभते अवतारक्षके
न प्रायः प्रावृषि वर्षाकाले गिरितटी कीदृशी विदवा दवाग्निरहिता जले कः कं धत्ते अहिः शेषनागः
अंभ्रीद्धस्म मध्याह्ने वलिते सति घनात्ययदिने कीदृशं सरोजातं पक्षे शारद्वतीपितवाग्यप्रदेशं ५७
हतं कीदृशमेगं दंतभवं कं वदंति विद्वांसः अतिलघुवाचि पदं किं केरिसु सुहरोमु होइ जाणो ५८ शिव
यिश्रंतमणु संस्कृतापभ्रंशे हतं छिन्नमंगं कीदृशं स्मात् विश्रं आमगंधि विद्वांसो विज्ञा दंतभवं ६०
कं वदंति तंतकारं लतुलसानांदंताइति किंपदमतिलघुवाचि अणु सुजनो जनः कीदृशो भवति
पक्षे विश्रांतमनाः संस्कृतापभ्रंशं ५८ किंसुंदमाहुः प्रायः केशविकारं च कासरे दर्शिता कथ-
रव

माभाकस्मिन्निशिकोलुब्धदिधीलपुलिसाणा ५९ रामलकम्मालंभे प्रायोमधंसुखंकमाकुः अ
लकंचूर्णाकुंतलं हरेःकादपितामालक्ष्मीः भ्रमावाकू किंअलं निधिराश्रोकस्मिन्भादीप्तिः भेनक्षत्रे ॥
धीरपुरुषाणांकोरावतं पक्षे समरकर्मारंभः ५९ कस्तंवेरमसुतइतिविख्यातःपृच्छतिसुरंहरिणाः
अहिलवणापलीलसोअसाकुरणोकेनैशाडज्रहरू ६० कलभएणा संस्कृतमागधिकं स्तंवेर
मसुतःकोरशावकइतिकोविख्यातः कलभः हरिणाःसुरंपृच्छति अभिनवानगरीअसाधोराज्ञः
केनोङ्कृतति एणाहेमृगाः पक्षे करभयेन ६० संस्कृतपेशाचिकं कोपारुणांकिमरुणायसर
स्यपूर्वकाष्ठाप्रतिष्ठिततनोरूपमानपात्रं पत्रंखनेनसरनंसगाहस्सरस्तापुत्रेहि किंपद्रसहि
शितुरंगमत्कं ६१ कपिलपनं पूर्वकाष्ठायांप्राचीदिशिप्रतिष्ठितातनुर्मूर्तिर्यस्यतथाभूत
स्यारुणाग्रेसरस्यरवेरूपमानपात्रंकोपारुणांश्रोथारक्तंकिंस्यात कपिलपनं सगरस्यराज्ञःपु
त्रैस्तुरंगमार्थं किंअविराङ्गिःक्षरोनमरणंप्राप्तं पक्षे कपिलपनंकपिलवनमितर्पोः ६१ श्री

वि॰सु॰टी
४१
५१

किंश्रीरायंतिजलदाःसैन्यंकीदृक्पलायतेसमरात् वक्रोभिरोधरः किंरुद्रसिरंकेरिसंभोदि ६१
चातकंचातरंकं संस्कृतपैशाचिकं जलदामेघाः कंश्रीरायंतिचातकं पपीहेतिप्रसिद्धं कीदृक्सै
न्यंसमरात् पलायते पक्षेकातरं त्रस्तं शिरोधराग्रीवाकेथते कंशिर रुद्रशिरःकीदृक्भवति प
क्षे जातंगंगातरंगं संस्कृतमागधिकं ६२ कोवर्णाद्यःकजलधिसुतंकंचदीर्घादिसंज्ञप्राहुर्बुद्धः ता ५
कमजयदसौतार्किकैःकेक्रियंते आमंत्रोविःकथयपविदितंकिंपदंहेतुवाचिजानंश्चेउपट्टसि
महिलीसाविवोकाब्रवीस ६३ अएवम्मारंवादावेदि वर्णाद्यःप्रथमोवर्णःकः अःअकारः जल
धिसुतालक्ष्मीःकस्याश्रीहरेःतं दीर्घादिसंज्ञंकंप्राहुः अनं प्रत्याहारविशेषणं असोबुद्धः कमजन शिव
यत् मारं मदनं तार्किकैःकेक्रियंतेवादाः पक्षप्रतिपक्षपरिग्रहाः वीःपक्षीः आमंत्र्य वेहेपक्षि ४१
न् कथयकिंपदंहेतुवाचिविदितं हि हिहेतावववधारणेऽमरः याश्चीनातिनुमेतिसापिकी
दृशीभवति पक्षे अहेसखिचम्मारंम्हदंगंवादावेहिवादय ६३ शब्दःकःसात्मत्यवचनः

कुंडलोकोस्मरारेः कामंभोधेर्हरिरुदहर द्दीवमः पृच्छतीदं हेडाकुंडीअरसिनरडीकीसअम्हा
रयेत्थंजेपुच्छिआसपुवायरि हेरुत्तरंकीसदेई ६३ नाहिकुंभार संस्कृतलौकिकं चित्रजातिः
पुरुषवचनोन्त्यवाचीशष्दः कः स्यात ना स्मरारेः शंभोः कुंडलोकोस्तः अहिसर्प्पौ अंभोधेःसमु
द्राद्धरिः कामुदवहत कूपथ्वीं धीवरः कैवर्त्तः इदंपृच्छति स्थालींकुंडीमस्माकमर्थे किंनानप्रसि
इति याप्रष्टापुरुषेणासापुनरुत्तरंकीदृशंवदति हेभारनाहिकुंभार हेभर्त्त नास्तिकुंभकारइत्य
र्थः संस्कृतलौकिकं ६३ कोनिवसइ... कंदसुंदरिगिरिगहणाकुंजमज्झंमि सहअ... णा
जुञ्जेसिहिगमणोकेरिसोहइ ६४ सरभसस वराहवग्गो हेसुंदरि गिरिगहनकुंजमध्ये
स्वछंदंकोनिवसति सरभ शयवराहवर्गः सहार्जुनेनयोद्धं शिखिगमनः कार्त्तिकेयः कीदृ
शोभूत पक्षे सरभसः सहर्षोयः शवराहवः किरातयुद्धं तत्रायः श्रेष्ठः ६५ काहइमणांपइ
णोगुणागणाजुवणासलाहणिज्जस्स कंपइवडुवडुत्तिसहोहअआसमणाकेरिसाहुंति ६६ सासव

ष्या भुक्त्वात्यक्ते गुणागराणांयौवनश्लाघनीयस्यपतुर्मनःकाहरति सरसवधूका सदृशावधूका
वा सततचटचटेतिशब्दाःहुताशनाःकीदृशाःसुः पक्षेसर्वपहुताः भुक्त्वात्यक्ते ६६ पाणिग्गह
णाणिायंसणुसोसहकेहिंमंडिउ साहसबुद्धविवीरपइरिउवलुकेहिंखंडिउ ६७ समरंगणो
हिं पाणिग्गहणेनिवसन्केमंडितंशोभते समरंजनैः सदृक्षरागैः हेवीर साहसवर्तिनात्वया
रिपुबलंकेखुरखंडितं पक्षे समरांगणेषु युद्धाजिरेषु ६७ रसियपहकेणुच्चाडणुकिज्जइ
इजुवइहमाणमुकेणुविजुइ तिसियलोयखणिकेणसुहिज्जइ रुकुयणाहमरुभुवणेगिज्जइ
६८ ~~नीरसशब्देन युवतीभिर्मनुष्यः केनोद्विज्यते~~ नीरससरसेण भुक्तापभ्रंशः शिव
त्रिभुवनेप्यप्रक्रमयाक्रियते रसिकानामुच्चाटनंकेनक्रिय नीरसरावेण नीरसशब्दे ४२
न युवतीभिर्मनुष्यः केनोद्विज्यते पक्षेनीरसरावेण तृषितोलोकः केनसुखीभवति पक्षेनी

रघुक्षेनशरावेण शुक्लापभ्रंशं ६७ सुपलोमेहंपुच्छइंपुच्छइमेहो विलंसदासुपलं केणाहवा
सपलसुखाकेराजशोविसइयापालम् ६८ शालाकसविलेण शूकरोमेघंपच्छतिकेनहता:
सगरसुता: भोवशाहकपिलेनमुनिना मेघोपितंशूकरंपच्छतिमन:केनपातालंविशति व
लाहकसेमेघ विलेनरंध्रेण ६९ धवलुज्जलेहिंकोहिं सोहइधवलगीमसारादेससस निल
यस्पलरक्कचालाकेहिंपलेवेढिपाहुति ७० नलकलंकोहिं शुक्लमागधिकं श्मशानदेशस्यधव
रागीधवलोज्वलै:कै:शोभते नरकलंकै: मनुष्यास्थिभि: निरयस्यरक्षपाला:कै:परिवेष्टिताभ
वंति पक्षे नरसरंकैदुर्गैते: शुद्धपैशाचिकं ७० वेरिपुच्छदिककनेराचतिकसनोखनोके
हिं सच्चाइंपियाणकेहिंवकपक्खिहिं नसमप्पंतिनिहितंकतांइंपि ७१ अहितपरिकाहिं वै
रिपच्छति गगनेह्लभ्रोमेघ:केराजते अहितहेपाद्यो वकेहिंवकपक्षिभि: कान्यांन्मेकांतह
तान्मपिके:समंनफलंति पक्षे अहितवाक्यै: सच्चाइंपियाणिंहसमगाहंतिनिहितंकयाइं

त्रिसु.टी
८३
५३

पिपाठे सत्यान्यपिहतानि निश्चितं कैर्न समर्थ्यंते उत्तरं तदेव ७१ पत्तनकिंपठयनो निधनरु
तानां प्रज्ञासनं पश्यति पंचतिस्त्तननस्य भोजनरवोर् तरुतकसपाद्पावा मोहं यपारागरुनेल
पकिंफलेते ७२ विसमशरणम् शुक्रपेशाचिकं भोविद्धन्वद भट्जनोनिधनेषुदुहताम्मा
किंप्राप्यजंभतिसूदनसंडूक्षाक्रासनेभजति विषमशरांकठिनयुद्धं पापाः पुरुषास्तारतमदुः
खपातानिप्रहृष्टपापानिभुक्त्वा किंप्राप्य च मोहांधरी कारागृहनं लभंते पक्षे विषमशरां विषेभ
क्षितेमोहांधकारप्राप्तिः ७२ याराधिनिद्राभंभलिसाकिसद्गुणश्चिद्र्यो भूरिसंभलि जो
तिल्वसरसवपीडयिज्ञाराणीकास्मभराजुखिद्रूसाविस्ताराणी ७३ तुतेध्वी शुक्रलोकिकं संभु
द्रजातिः यानिद्राविद्रूलानजानाति सा कीदृगुच्यते स्त्तावद सुप्तिशीला पतितलशर्षपावां
घनं घठिनं समूहं वापीडयति सविज्ञानी कीदृगुच्यते पक्षे शुद्धलोकिलं संभुद्रजातिः ७३
एतावतापि दिङ्मात्रं प्रश्नानां दर्शितं मया येनयेन हिमाधंतितद्विस्तततदुच्यताम् ७४ म

शिव
८३

याधर्मदासेन एतावताकृत्वाप्रश्नानोनादिउत्तरं दर्शितं तद्विदः प्रश्नवेत्तारोयेनयेनमार्येतिह्यंति
तेसंतुच्युतांभरायतामित्यर्थः ७४ मकुप्रियाख्यात्मनिजात्मजोकोतथोखरोकोचवराष्ट्रदेशो मयू
खाङ्का कथ्यतामयोनिंकोहंतिकः किंशिशवः पठंति ७५ ककाकिकीकुकूकेकेकोकोकंकः
एकव्यंजनजातिः कमभिसरतिलक्ष्मीः कंसरागेरजप्यंसकलमलविमुक्तंकीदृशंज्ञानमुक्तम्
सततरतविमर्दे निर्दयेवद्धबुद्धिः किमभिलषतिकांताकिंचचक्रेहनूमान् ७६ अक्षरराम
वलद्विदुजातिः दैत्यानांभोक्तः संहर्ताराजाकीदृग्विधोविधात् ग्रामाः केनावाससमारुगांभीर्यमा
समातः कः ७७ अकूपारः वलद्विसर्गजातिः इदंकाव्यत्रयमन्यत्कृतम् ॐ ॐ इतिधर्म
दासविरचितेविदग्धमुखमंडनेतृतीयः परिच्छेदः ३ ॐ ॐ मनीहंसकिमप्यर्थं स्वरू
पार्थस्यदर्शनात् यत्रवाह्यांतरावर्थौकथ्यतेसाप्रहेलिका १ यत्रप्रश्नेकिमप्यर्थं मनीकृतम्
करीकृत्यवाह्यांतरावर्थौकथ्यते कस्मात्स्वरूपार्थस्यगोपनात्साप्रहेलिका १ साद्वियार्थीव

वि.मु.टी ४४ ५५ शाद्वीचविख्याताग्रथ्रवासने अर्थीस्यादर्थविज्ञानात्‌शाद्वीशब्दविभंगतः २ शाद्वेति
काद्विधाशब्दशासनेप्रख्याताभवति कथं एकार्थाद्वितीयाशाद्वी दर्थविज्ञानादपूर्वार्थदर्शनार्थे
दर्शनार्थाभवति पुनःशब्दानुभंगः शब्दविशेषतः शाद्वीस्यात्‌ २ तरुणापालिंगितःकंठेनितंब
स्थलमाश्रितः गुरूणांसंनिधानेपिकः कूजतिमुहुर्मुहुः ३ पानीयकुंभः तरुणायाकंठेआलिं
गितःसन्नितंबस्थलमाश्रितः गुरूणांसन्निधानेपि मुहुर्मुहुःकःकूजति यस्तावदुक्तोभव
तिसएवंविधोनभवतिकिंतुपानीयकुंभः बाह्यार्थोमतो मध्यार्थःकुंभः ३ आपांडुपीन
कठिनंवर्तुलंसुमनोहरं करैराकृष्यतेतस्यकिंवृद्धैरपिसस्पृहं ४ पक्वबिंबफलं आपांडु शिव ४४
समंततःपीतं पीनकठिनं स्थूलकठोरंवर्तुलं सुमनोहरं एवंभूतंकिं वृद्धैरपिप्रवयोभिरपि
सस्पृहं यथास्यात्तथाकरैर्हस्तैरत्यर्थमाकृष्यते बाह्यार्थंस्तनयुगलं मध्यार्थंपक्वबिंबफलम्‌
अर्थीजातिः ४ दुर्वारवीर्यसरुषित्वपियाग्रसुप्ता स्यामासपत्न हृदयेमुपयोधराव.

तुष्टेपुनः प्रणतशत्रुसरोजसूर्य्ये सेवाघवर्णरहिता वदनामकास्यात् ५ शस्त्री दुर्वारवीर्य्यत्व
यि[illegible]सरुधिरूढेसति सपत्नहृदयेया प्रविष्टा प्रणतशत्रुसरोजसूर्य्येनाम्नारिपुमार्केत्वयि
पुनस्तुष्टेसति सेवाघवर्णरहिता कास्यात् नामेतिसंभाष्यते शस्त्रीकटारिका क्षुरि पक्षे स्त्री किं
भूतासा श्यामालक्ष्मा पक्षेष्यामाम्ग्रस्तता चपुनः सुशोभनंयत्पयस्तद्धरतीति पक्षे सुशोभनौ
पयोधरौ स्तनौयस्याःसा ५ सदारिमध्यापिनवैरियुक्तानितांतरक्तापिसितेवनितसे यथोक्त
वादिन्यपिनेवसूतीकाभौनामकांतेतिनिवेदयाशु ६ सारिका सकारंददातीतिसदारिमध्या
रिकारमध्या अथवा सदारिमध्यापिमानुमध्यापिनवेरयुक्ता नितांतमतिशयंरक्तापिसिते
वनितसे वद्धेवपंजरे कांताककारांता यथोक्तवादिन्यपिसूतीनभवति साकासादितासुनिवे
दय उत्तरं सारिका पक्षे सारी सारीनेतिप्राकाव्ये ६ नीरसउपुरावहृगुरावेतोभमहू
निरंतरनिम्बलकुंतउ तरुगिजुउरा उफलपत्तउत सुजोपरियाणाड् यावद्सोजसु ७

वि॰मु॰टी
४५

गुणांतरको नीरसः पुनः वक्रगुणवान् नित्यंपरिभ्रमति परंतुनिश्चलतरुर्निगद्यते पुनःतरोःफ
लपत्राणिनसंति योजानातिसयशस्वीभवति गुणवृक्षः अधराख्यमध्यस्तंभः रूपकोगुणवृक्ष
कउत्तमरः ७ घरिघरिबध्धइससफलपियारीजिमरुहवइलीलोपरनारी खणिवज्झइमु
च्चइइकेछीतहजायसुजहजाइनयेछी ८ पासासारिः प्रहेलिकाजातिः यानाधिकासकलजन
प्रियाग्रहेगृहेव्रजति तस्मातवैरिलोकस्यनारीभ्रमति क्षणेनबध्यते क्षणेनमुच्यते क्षणेनैकाकिनी
प्रेरितासतिनोयाति यथाजानीयसाका पासासारिः उभयस्वरूपप्रहेलिकाजातिः ८ कालसा
रादिकंहर्षं अजमारादिगूढकं विदग्धाकुर्विदग्धानां कुर्वतेदर्पशांतये ९ विदग्धाश्चतुराःदुर्विद शिव
ग्धानांदर्पशांतयेगर्वपरिहाराय कालसारादिकंगूढंकुर्वंतीत्यन्वयः ९ अनुनेतुंमानिनमादधि ४५
तश्चरागेरागारुणायाः पाः यावत्पतितःसतयाततःक्षणामवधीरितः कस्मात् १० अकालः सराग
चरणायामानिन्याश्चरणे॰ नुनेतुमनुनयंकर्तुंदधितोयावत्पतितःसतयामानिन्याततःक्षणामेवसोऽ

वधीरितोमामास्पर्शेतिपूरीह्नतः कस्मात् यतोरजस्वलाजाता कालगृहकम् १० अयलोकयस्तनौव
धागुंजाफलविभूषणो निःश्वसरोदितुंलग्ना कुतोआयकुंडुंविनी ११ आयकुडुंविनीवधास्तनोगुं
गुंजाफलविभूषणो दृष्ट्वानिश्वसरोदितुंलग्ना कुतः यतोमस्तुअस्यहस्तिहननेवलंनास्ति तेनगुंजाफ
लविभूषणोजातौ अतः कारणात्सारुष्टं कालसारादिजातिः ११ दरदिठचूयमउलंपिहिपस
हियाहिविरहिणीसहियं नमिअकिंकिंचितरूसुउचलाहदोकओ १२ दृष्टचूतमंजरितं दृष्ट्वात
यासखीनिजसखींविरहिणींदृष्ट्वाकिंकेलितरुंनमितो अतःसहकारश्चरणोर्हतः कुतः केनापिकधि
ते अस्मिन्नवलेकेपुष्पितेः साप्रियतमः समेष्यति अतः कारणात् तदर्पीने अस्याः समरकंजातं १२
पिहंतमणिाभिसछंपिहिपञ्चकुयाद्रजगतिभिक्षुपरं दंसियकयाइसीकेकत्तोदोजाइकुसुमाइं १३
रूधजातिः कयाचनवधाः निमेषारंभभिक्षाचारं दृष्टाजटितिशीघ्रं देजातिकुसुमेदर्शयित्वापीर्थेक्ष
तेकिमिति आयपोः पुष्पयत्कुलेनिर्मलेविधेते १३ रविमुतलतनगोकर्णः अतिविषयगुणांवना

वि.मु.टी.
४६
46

त्प्रकरः नरकशिराजगदखिलं चिरमव्यात् समरुक्पाणिः १४ रविसुतः कुंभो सूर्याज्जातः कर्णः
अर्थात्कर्णो येः हृतौ कुंडलत्वेन विहितौ गोकर्णौ चक्षुःश्रवसौ सर्पौ येन सः श्रुतिविषयः पादः स एव
गुणो यस्य तत् श्रुतिविषयमाकाशं तद्देवांबरं वासो यस्य सः धरा पृथ्वी सैवात्मा तं धारयतीति वा धरा
त्मा पर्वतपुत्री तं धारयतीति वा वनात्मधर इति पाठे वनात्मानं जलमयं धारयतीति नराणां कानि
शिरांसि शिरसि यस्य सः वा नरस्य हरेः कं जलं गंगा शिरसि यस्य सः असमरुक् त्रिशूलं पाणौ यस्य
स एवंभूतो महेश्वरः अखिलं जगदव्यात् रक्षत्विति संबंधः अजगरुकं १४ कुबेरेन सूर्योन यनाश्रया
यदश्योन्मदाद्दर्दुरः हर्षकाले अजन्मभक्ष्यप्रियभोजनाशान्त्यैति भीमानुजगो जंभाजः १५
अनमारुरूठं कुः पृथ्वी ध्रियते इति कुध्रः गिरयस्तेषां भिनः स्वामिनः प्रभोर्हिमाचलात्सूतत्प्रीति शिव
सूः गौरी तां प्रीणयतीति प्रीः शंभुस्तस्य नयनाश्रयाशोलोचनवह्निस्तेन दग्धः कामस्तेनोन्मदा गिरि ४६
राजसुतापतिनयनदग्धकामहर्षाः स्वस्माज्जन्म येषां ते स्वजन्मानस्तनूजाः त एव भक्ष्या येषां ते
सर्पास्त एव प्रियं यद्भोजनं तन्नाशात् भ्रमायेषां ते वा स्वस्यात्मनो जन्म यस्मात्तद्धोऽकार्यमिति त

उद्वक्ष्यतिपः सस्य जन्मभक्ष्यः पावकः प्रियो यस्य वायोः स भोजनं येषां ते सर्पास्तान् अश्नंतीति अर्जुनस्य
स्थिताः सेतोन्त्र्यंति कदा दर्दुराणां मंडूकानां हर्षकालो वर्षाकालस्तस्मिन् अजमारमूढके २५ विष्वं
भुंक्ष्व महाराज त्वं जीवखरदायाप्तं विनाकेन विनानाम्नां तस्मात् जिनमकं त्वं २६ हे राजन् अमात्यै
मंत्रिभिस्सह धर्मं कथाराधुर्वं निश्चलं प्राप्नुहि वरं श्रेष्ठं स्फीतं समृद्धं तस्मात् जिनं च भुंक्ष्व केन विना ककारं
विना नाम्नां विना नकारद्वयं विना किं मृतं तस्मात् जिनं विषं विगतो विनीतः यकारो यत्र तत् तस्मा
जिनमित्यत्र ककार यकार नकारद्वयापगमे अजिश्रेइति स्थितं तत्र सन्धौ राज्यमिति सिद्ध्यति हे राजन्
राज्यं भुंक्ष्वेत्यन्वयः २६ वातावीतिरिभ्रोरं यो हरतान्महासुरीदयितः वीडब्राड्यानो कावाग्वीराभोयाम
स्ताना २६ इयदग्मूढके वातमनीति यातास्सर्पस्तस्मिन् वीतिः पायनं यस्य सः अरिर्वैरी ध्रियते नेनेति
अरिभ्रः महान् अश्वः धारणायस्य सः महासिरिति पाठे महान् असिः खड्गो यस्य सः ईदयितो लक्ष्मीदयि
तः प्रिय इत्यर्थः वीन्पक्षिणा ईष्टे ऐश्वर्यं धास्तीति वीट् गरुडः अपां राजा अब्राट् समुद्रः पानं व ओ कस्य पा

वि·मु·टी
४७

५७

नौकसी वीडग्राजैयानौकसी वाहनं गरुडेयस्यसः वाजैलेवहतीतिवाजीहोमेघस्तस्यैवायस्यसः अस्तमुद्र
क्षालितमनः शकटं येन सएवंभूतो विष्णुर्वो युष्माकमशममसुखमरमत्यर्थं हरतादूरीकरोतु १६ दयाया
आयतः शुद्धः प्रबुद्धकमलेक्षणः पापापहस्त्रिभुवनं बुद्धः पापादपायतः ४ तुर्यपादगूढं बुद्धस्त्रिभु
वनं अपायतो विपदः सकाशात्सायात् रक्षतु किंभूतो बुद्धः दयावान् दयालुः पुनः किंभूतः अयतः पवित्रः
पुनः किंभूतः शुद्धः पुनरपि किं प्रबुद्धकमलवदीक्षणे नेत्रे यस्य सः पुनरपि किंभूतो बुद्धः कलुषहरइत्य
र्थः अत्र चतुर्थे चरणे विधीयमाना बुद्धइत्यादीनि त्रीणि पदानि अर्थादावेव चरणत्रये गुप्तानि वर्तंत
इति पादगूढं ४ नमज्जति क्वचिद्दोषे प्रीणाति जगतो मनः यएकः सपरं श्रीमान्चिरं जयति सज्जनः
१८ तुर्यपादगूढं यः एकः क्वचित्कदाचिद्दोषे न मज्जति जगतो लोकानां मनश्चित्तं प्रीणाति तोषयति सः
श्रीमान्सज्जनः परं केवलं चिरं जयति सर्वोत्कर्षेणावर्ततइत्यर्थः इहापि पूर्ववत्पादगुप्तिः पदगूढात्पाद
गूढस्य भेदो विवक्षावशात् १८ इति पादगूढकम् दृष्टो मया सखि वक्त्र हि रोदयि त्वागतो घर्मो भद्रे
कल्याणिनी भूयाः प्राचीं पश्यामि निर्मलो १६ कांचित्सखीं प्रतिस्वप्नं कथयति यः प्रियो मया दृष्टो मां

शिव
४७

रोदयित्वाऽभ्यगातः इति श्रुत्वा सखी वक्ति हे भद्रे कस्माच्छोचसि सौभाग्यवती भूयाः प्राचीं पूर्वदिशं निर्मलां प
श्यामि अयमाशयः प्रातःकाले स्वप्नोऽस्मिन्काल एव फलति स्वप्ने रोदनं प्रशस्तमित्याशीः १९ दक्षिणापवना
द्विग्गसंमीलल्लोचनाग्रपथिकवधूः निपुणसहितुरनीरकण्ठं चकरोति हि ठकेऽ २० अर्थगूढं गूढजातिः
दक्षिणापवनो द्विग्गसंमीलयति लोचनानि पथिकवधूः निपुणसखी पुनरस्याः कर्णविवरान्ते इति विदधा
ति इतः परं कोकिलशब्देश्च तेजीवनसंदेहः कदाचनास्याः प्राणा निर्यास्यन्ति कुतो यतः इयं गतभर्तृका इति हे
तोः कर्णमुद्रणं २० अर्थगूढकं स्तुतिनिंदे तदर्थत्वाद्यर्थमर्थश्लेषोदयात् निरूढान्कथितस्यापि पशव्
छलादपह्नुतिः २१ तदर्थत्वात्स एव स्तुतिनिंदारूपोऽर्थो ययोः स्तुतिनिंदयोः तयोर्भावस्तस्मादपह्नुतिर्भवति
२१ बहुदोषो गुणध्वंसी गोहन्ता जनपीडकः कोऽनुविरचो लोकमस्तमाप्नमहोदयं २२ विष्णोः स्तुति
निंदे बहुदोषइत्यादीनि पदानि निंदार्थस्फुटान्येव प्रशंसामाह बहवश्चत्वारो दोषो भुजायस्य सः भुज
बाहुप्रकोष्ठो दोरित्यमरः गुणान्सत्वरजस्तमांसि ध्वंसतीत्येवंशीलः गोर्धेनुकासुरस्य हंता जनान्राक्षसान्

वि॰मु॰टी
५८
48

पीडयति वि:पक्षीरथोयस्यस: एवंभूत:श्रीलक्ष्मीस्त्वंविपन्नंलोकमापन्नमहोदयंसंपत्तियुक्तंकरोतु विष्णो:स्तुति
निंदे २२ सततमहितजनवत्सलबहुभयपापक्रियापरिभ्रष्ट: इहकलिकालेकुपतिर्जातस्त्वंपरमदु:खकर:
२३ राज्ञ:स्तुतिनिंदे इहकलिकालेत्वंकुपति:पृथ्वीपतिर्जात: पक्षेकुपति:कुत्सितपति: किंभूतस्त्वं सततम
हितानिरंतरपूजिताये जनास्तेषांवत्सल: तेवत्सलायस्यस: अतिसाधुप्रियइत्यर्थ: पक्षे सततंनिरंतरंअहि
तजनवत्सल: पुन:कथंभूत: बहुभयाचासौपापक्रियाचबहुभयपापक्रियातस्या:परिभ्रष्ट: अतिभयपापाचर
णरहितइत्यर्थ: पक्षे बहुभयपापक्रियया परिभ्रष्ट:पापाचरणेनपतितइत्यर्थ: पुनरपिकीदृश: परमत्यर्थंअदु:
खकर:सुखकरइत्यर्थ: पक्षेपरमंचतद्दु:खंचतत्करोतीति राज्ञ:स्तुतिनिंदे स्तुतिनिंदाजाति: २३ प्रसन्नवदन
श्रीमानयंलब्धमहोदय: करप्रचारसुभगोराजानंदयतिप्रजा: २४ चंद्रभूपती अयंराजाप्रजा:आनंदयति
राजामृगांकेक्षत्रियेन्दुयेलमर: प्रजास्यात्संततौजनेइत्यमर: कीदृशोराजाप्रसन्नवदन:पुन:कीदृश:श्रीमान् पुन
कीदृश: करस्यदंडस्यप्रचारेणसुभग: चंद्रपक्षे किरणप्रचारेणसुंदर: २४ चंद्रभूपौ· विनायकाहितश्रीति-
र्योगेगांबभारय: सर्वदोमाधव:सत्वामव्यादर्धव्यतिक्रम: २५ शंकरवासुदेवौ अर्थजाति: सहमाधव:

शिव
५८

अव्यर्थोविक्रमोयस्यसः विष्णुपक्षे समाधव त्वांअव्यात् योदेवोऽगं गोवर्द्धनाख्यं बभार किंभूत [illegible]

शंभुः सर्वदात्वामव्यात् रक्षतु योदेवोगंगांबभार किंभूतोमहेशः विनायके आहिताप्रीतिर्येनसः पुनःकिं
भूतः विनायवीनांपक्षिणांनायकोगरुडस्तस्मिन्नाहिताप्रीतिः यद्वाविनायकादीनांस्तेष्वाहितप्रीतिः पुनरपिकिं
भूतः सर्वंददातीतिसर्वदः पुनरपिकिंभूतः अव्यर्थः पर्वतार्थेविक्रमोयस्यसः विक्रमस्त्वतिशक्तिताड्
समरः अव्यर्थविक्रमइतिपाठे शिवपक्षे अनिबलः हरिपक्षे अव्यर्थे विनागरुडेनपक्षिणाक्रमोगम
नंयस्यसः शंकरवासुदेवौ सर्वजातिः २५ शीत्कारंशिक्षयतिव्रणयत्यधरंतनोतिरोमांचं नागरि
कः किमुमिलितोनहिनहिसखिहेमनःपवनः २६ अपह्नुतिजातिः काचित्कांचनप्रतिवक्ति किन्तु
वितर्के नागरिकोमिलितः अधरमोष्ठंव्रणयति तं क्षतयति रोमांचंतनोति सात्त्वाप्रतिक्र
यति नहिनहिनागरिकोनमिलितः किमुहेमनः हेमंततौवायुः वायुरपिहिमसंसर्गान्नागरक्रि
यांकरोतीत्यर्थः २६ रुचिरस्वरवर्णपदारसभाववतीजगन्मनोहरति तत्किंतरुणीनहिनहिवा
णीकवैर्मधुरशीलस्य २७ कश्चित्कांचनप्रतिकथयति जगन्मनोभुवनाचित्तंयनात्किंतरुणीहरति

वि॰सु॰टी किंभूतातरुणी रुचिरोमनोज्ञः सुशोभनोवर्णः पदंचरणंयस्याःसातथोक्ता पुनःकिंभूता रसभाववती
४८ शृंगारभावयुक्ता सतंप्रतिकथयति नहिनहितरुणीनरुरति मधुशीलसोन्नमधुचनस्य स्वभावस्यवा
५९ रास्पलाराभहृस्यकेयचरणीजगन्मनोहरतीत्यर्थः किंभूतावाणी रुचिराणिशारलानिमनोज्ञानिसुव
र्णानिशमीचीनान्यक्षराणिचपदानियस्यांसा पुनरपिकिंभूता रसाश्शृंगारादयःभावाःस्थायिसंचा
रिभेदाः स्वेदस्पृदिनिर्वेदादयस्तैर्युक्ता अपकृतिजातिः २७ स्वरेसुविंदुयुक्तेषुहलानांयदवोधनंत
द्विंदुमतीतिदिग्राहुः केचिद्विंदुमतीमिति २८ विंदुयुक्तेषुस्वरेसुसत्सुहल्लांहलानामक्षराणांयदव
वोधनंकवयस्तद्विंदुमतीदितिप्राहुः केचिद्विंदुमतीमितिकथयंति २८ मानसीनाभसीत्याद्यायुक्त्वादे
न्यासताहियाः वाकुल्येनाप्रयोगास्तानेहतासांनिदर्शनं २८ दैन्यासितामानसीनाभसीत्याद्याजात शिव
यस्तासुवाकुल्येनाप्रयोगाःसितेयस्तस्मादिहग्रंथेषुप्राहत्वातासांजातीनांनप्रदर्शनमिति २८ ०० ४८
०० ०ॢ ०ा ०ं ०ं ०िं ०ं ०ि ०ं ०ेः ०ु ०ु ०ं ०ो ०ं ०ि ०ंः ०० ०ु ०ं ०ं ०ि ०ु ०ॢ ०ा ०ु ०ं ०ं ०ं ०ो ०ं ०ं ०ो ०ं०ं

ॐ ९॰ त्रिनयनचूडारत्नंमित्रंसिंधोः कुमुद्वतीदयितः अयमुदयतिघुसृणारुणारमणीवदनोपमश्चं
द्रः ३० विंदुमतीजातिः त्रिनयनस्यशंभोश्चूडारत्नंशिरोमणिः सिंधोःसमुद्रस्यमित्रं कुमुद्वतीदयितः
कुमुदिनीभर्ता घुसृणेनकुंकुमेनारुणारक्तंयद्रमणीवदनंतदुपमोयंचंद्रउदयति विंदुमतीजातिः ३०
क्रियादिकंस्थितंयत्रपदसंधानकौशलात् स्फुटंनलक्ष्यतेतस्यक्रियागुप्तादिकंयथा ३१ यत्रस्थितमपि
क्रियादिकंस्फुटंनलक्ष्यते कुतःपदसंधानेपदयोजनेयत्कौशलंचातुर्यंतस्मात् तत्क्रियागुप्तादिकमुच्यते
यथास्यात्तथाह ३१ राजन्ननघनश्यामनिस्त्रिंशाकर्षदुर्जयः आकल्पंवसुधामेनांविद्विषोघुरणोवह
न् ३२ हेराजन् घनवच्छ्यामोयोनिस्त्रिंशःखड्गस्तस्याकर्षआकृष्टिस्तेनदुर्जयोऽजेयस्त्वमाकल्पंकल्पप
र्यंतं एनांवसुधांभूमिं अवरक्ष अवरक्षणेलोट्मध्यमपुरुषैकवचनेरूपं रणेयुद्धेबहून्विद्विषः शत्रून् घ
नंदुय दोम्रवखंडनेलोट् मध्यमपुरुषैकवचनेरूपं अवेमत्रयेमन्त्रक्रियागुप्तिः नवेद्यतेतिभ्रमः ३२
पुंस्कोकिलकुलस्यैतेनितांतमधुरारवैः सहकारदुमारम्भावसंतेकामपिश्रियं ३३ क्रियागुप्तम्

वि॰मु॰टी
५०
50

एतेरम्भाः सरुकारकुमारसालतरवः कामपि अनिर्वचनीयां श्रियं शोभामधुः धारयंतिस्म। क्व वसंते केः पुंस्कोकि
लकुलस्य नितांतमत्यर्थमारवैः शब्दैः अकरम्भमात् क्रियागुप्तिः ३३ नकरोतु नाम रोषं नवदतु परुषं
न हंतु वयं शत्रून् रक्षयति महीमखिलां तथापि धीरस्य वीरस्य ३४ अयं वीरो रोषं न करोतु क्रोधं न विद
धातु परुषमभाषणां कठोरं नवदतु शत्रून्न हंतु नामेतस्यानुषंगः तथापि वीरस्यास्य धीः कर्तृ अखिलां
महीं रंजयति रक्षयति धीरस्येत्यत्र धीरशब्दभ्रमः ३४ शरदिंदुकुंदधवलं नगनिलयं मनोहरं देवं
ये सुकृतं हन्त मनिशं तेषामेव प्रसादयति ३५ कर्तृगुप्तं तेषामेव पुंसां मनः कर्तृ हरं देवं प्रसादयति ये
रनिशं सततं सुकृतं हृतं कीदृशं हरं शरदिंदुः शरत्कालीनश्चंद्रः कुंदः पुष्पविशेषः तद्वद्धवलं शुभ्रं पुनः
कीदृशं नगः कैलासः स एव निलयो गृहं नत्र रतस्तं मनोहरमिति भ्रमः कर्तृगुप्तं ३५ सीकरासारसं
वाहं सरोजवनमारुतः प्रक्षोभयति पांथस्त्रीनिःश्वासैरिव मांसलः ३६ जवनमारुतो वेगवद्वायुः स
रः कासारं कर्म प्रक्षोभयति किंभूतो वायुः शीकराणामंबुकणानामासारो धारासंपातस्तं संवहती
ति तथोक्तः वायुः कइव पांथस्त्रियः पथिकवध्वस्तासां पतिविरहाद्ये निःश्वासास्तैः मांसलः पुष्ट इव

शिव
५०

सरोजशब्दश्च अमोत्र ३६ शुभगतयाननपंकजदर्शनसंजातनिर्भरप्रीतः शमयतिकुर्वन्दिवसःपुराप
वतःकस्मरमणीयः ३७ कर्तृगुप्तं हेसुभगारमणीयोदिवसःकस्यपुराप्रवतः पुंसः शंसुखंकुर्वन्नयाति
अपयगतो शमयतीतिभ्रमः किंभूतस्यपुरापवतः तवयदाननपंकजंसुखकलंतस्यदर्शनेनसंजा
तनिर्भराअतिशयिताप्रीतिर्यस्यतथोक्तस्तस्य कर्मगुप्तं ३७ पूतिपंकमयेल्पयेल्पथे कासारेदुःखिताश्र
मी दुर्वारामानसंहंसागमिष्यतिघनागमे ३८ अमीहंसादुर्वादुर्निवाराःसंतोमानसंसरः प्रतिगमिष्यं
ति कदाघनागमेवर्षाकाले किंभूताहंसाः अल्पथेदुःखिता केन पक्षेदुर्वाराद्युष्टजलेन वार्वारिसलिल
लंकमलंजलमित्यमरः कासारे किंभूतेकासारे पूतिपंकमये दुर्गंधिकर्दमयुते ३८ अहंमहा
नसाद्यातःकल्पितोन्तकरस्तव मयामांसादिकंभुक्तंभीमंजानीहिमांवक ३९ कारणगुप्तं अहंमहा
नसाद्यातः पंचमीतत्पुरुषः पाकस्थानाद्यागतइत्यर्थः पक्षेमहानसामहाशाकटेन तवान्तकरोमनुष्य
दंडः कल्पितः मयामांसादिकंसर्वंभुक्तं हेवक हेदेव त्वंमांभीमंजानीहि कारणगुप्तं ३९ अभो

रुहमयेस्नात्वावापीपयसिकामिनी ददातिभक्तिसंपन्नापुष्पंसौभाग्यकाम्यया ४० भक्तिसं
पन्नाकामिनीसौभाग्यकाम्ययाइःकामस्तस्मैअये अंभोरुहंपुष्पंददाति किंहत्वावापीपयसिस्ना
त्वा ४० प्रसत्नापुत्रमार्गस्थतवसंमानमाश्रिताः स्पृहयंतिनकेनामगुणरत्नालयप्रभो ४१
संप्रदानगुप्तं हेउत्तमार्गस्थहेसंमानित हेगुणरत्नालय गुणासमुद्र हेप्रभो आश्रिताःसेव
काः केतवप्रसत्नेप्रसादादाननस्पृहयंति वांछंति नामेतिसंभाव्ये संप्रदानगुप्तं ४१ शिली
मुखैस्त्वयावीरदुर्वारैर्निर्जितोरिपुः बिभेत्यंततमालिनोवनेपिकुसुमाकुले ४२ हेवीर
त्वयादुर्वारैःशिखीमुखैर्निर्जितोरिपुःशत्रुः कुसुमाकुलेपिवनेपिअलिनोभ्रमरादपि अत्यं शिव
तंबिभेति अलिवाणौशिलीमुखाइत्यमरः अत्यंतमलिनइतिभ्रमः ४२ सरसीतोयमुद्धृ ५१
त्यजनःकंदर्पकारकं पिबत्यंभोजसुरभिस्वच्छमेकांतशीतलं ४३ आपानगुप्तं अयंजनः
सरसीतःकासारात्कंजलमुद्धृत्यपिबति सरसीतोयमितिभ्रमः किंभूतंकं दर्पकारकं मदज

जनकं किंभूतं अंभोजसुरभि कमलसुगंधि पुनरपिकिंभूतं स्वच्छं निर्मलं पुनः किंभूतं
एकांतशीतलं भृशहिमं ८३ याकटाक्षछटापातैःपवित्रयतिमानवं एकांतेरोपिप्रीतिर
स्तिसाकमलालया ८४ याकटाक्षकटापातैर्मानवंपवित्रयतिसाकमलालक्ष्मीरेकांतेरहः
स्थाने पक्षे एविष्णौकांतेप्रियेरोपितप्रीतिरस्ति अत्रेकांतशब्दभ्रमः ८४ विपद्यमानतासिद्धा
सर्वस्यैवनिरूपमा तयाचभस्मपादाभ्यांनिर्वाणांहंत्ययंजनः ८५ जनस्यविपद्यापत्तौग्र
मानता अनादरंसिद्धा तयाचेतिनिदर्शने अयंजनःपादाभ्यांनिर्वाणां अदाहकंभस्महंति
विपद्यमानशब्दभ्रमः ८५ हरीवमधुमासेस्मिन्रसालद्रुममंजरी द्वयमुद्भिन्नमुकुले
भातिन्यस्तशिलीमुखाः ८६ संबंधगुप्तं अस्मिन्मधुमासेवसंतेइयंरसालद्रुममंजरीभाति
शोभते उद्भिन्नमुकुलाएः इतिछेदः कथंभूतारसालद्रुममंजरी उद्भिन्नमुकुला अंकुरितकु
अला कथंभूता न्यस्तशिलीमुखा अलिवारोशिरवीमुखावित्यर्थः उत्प्रेक्षतेकविः इः कामः

वि·मु·टी
५२
54

तस्मरेः मदनस्य तरुणीव भर्त्यं ढिवेव उद्भिन्नमुलैरित्यत्र तृतीयावकुवचनेभ्रमः ४६ अदो म
धुमध्यंप्राप्तंभुक्तंपीतमनुभूतंवा मासश्चद्रुमसः प्रबलामहती रुग्दीप्तिः प्रियतमोपिदूरस्थः इयमसती
वंधवीसन्निहिता निकटवर्तिनीनियतंनिश्चितंसर्वाहृतपीत्वा हाकष्टमिदं मधुमासशब्दस्यद्वयमेक
वचनेभ्रमः ४७ संबंधगुप्तकं सर्वज्ञेनत्वयाकिंचिन्नास्यविज्ञातमीदृशं मिथ्यावचस्तथावत्व
मसत्यंवेत्सिनकश्चित ४८ हेसर्वज्ञ हेइन हेप्रभो ईदृशंकिंचित्त्वयाऽविज्ञातंनास्ति तथापित्वम
सत्यंवचोवाक्यंमिथ्याकश्चिन्नवेत्सि सर्वज्ञेनेत्यत्रतृतीयैकवचनेभ्रमः ४८ कमलेकमलेनित्यं
मधूनिपिबतस्तव भविष्यतिन संदेहः कष्टंदोषाकरोदये ४९ कंअलेइतिच्छेदः अलेहेभ्रम
र कंसुखंवयथास्यात्तथाकमलेपद्मेमधूनिमकरंदान्नित्यंप्रत्यहं पिबतस्तवदोषाकरोदयेचंद्रोदये
संदेहोनभविष्यति कष्टमेतत कमलेइत्यसप्तम्येकवचनेभ्रमः आमंत्रितगुप्तं ४९ विषादीभे
क्ष्यमश्नातिसदारोगंनमुंचति कष्टेनापित्वयावीरशंभुनारिःहैतःसैमः ५० समासगुप्तम् शिव ५२

विषमत्तीतिविषादीयंभुः पक्षे विषादोस्यास्तीति भैक्ष्यंभिक्षोपस्थितमन्नादिमश्नाति भुंक्ते सदारः स
स्वदारैर्वर्ततइति अगांकेलासंनमुंचति पक्षे सदासर्वदारोगंआधिंनमुंचति हेवीरक्रुद्धेनापित्वयारिपुः शत्रुः
शंभुनारुद्रेणासमः स्मृतः सदृक्षः स्मृतः अत्रसशब्देनरोगभ्रमः ५० नित्यमाराधितादेवैः कंसस्यद्विषतस्त
नुः मंडनाग्रंरथांगंखंचक्रंजयतिबिभ्रतीः ५१ समासगुप्तं कंसस्यद्विषतोहरेर्मूर्तिर्जयति किं।कुर्वतीत
नुः मंडलाग्रंखड्गंदांकौमोदकीं शंखंपांचजन्यं चक्रंसुदर्शनंबिभ्रतीदधती पुनःकथंभूतातनुः नित्य
मानित्यालक्ष्मीर्यस्याः सासंततेंदरा पुनरपिकीदृशी देवैर्ब्रह्मादिभिराराधिता आराधितेति पदभेदभ्र
मः समासगुप्तकम ५१ नितांतस्वच्छहृदयंसखिप्रेयान्समागतः त्वांचिरादर्शनप्रीत्यायःसमालिंग्य
रंस्यते ५२ लिंगगुप्तं नितांतस्वच्छहृदयमितिछेदः हेसखिसोयंप्रेयान्समागतः कीदृशःप्रेयान् नितां
तमत्यर्थंस्वच्छंशुद्धंहृन्मनोयस्यसः यश्चिरादर्शनप्रीत्या अवलोकनप्रेम्णा त्वांसमालिंग्यरंस्यतेक्रीड
यिष्यति ५२ कलिकालमियंतावदगस्त्यस्यमुनेरपि खंडयतिमनःकोहं दाभिरवंडानुसारिणी ५३

का

55

कलिका अलमितिछेदः तावस्थद्योवाक्यालंकारे अगस्त्यवृक्षविशेषस्सेयंकलिकामुनेरपिमनःखंड
यति अलमतिशयेने वक्तिकश्चित् अहंकः मदीयंमनःखंडयति किंवाअमत्र मनकोयमित्यपिपाठःकी
दृशीकलिका शशिखंडंचंद्रखंडंअनुकरोतिविडंवयतियासा लिंगाग्रुपकं ५३ प्रमोदंजनयत्येवसदा
रागृहमेधिनः यदिधर्मश्चकामश्चभवेतांसंगताविमो ५४ सुपवचनगुप्तं सदाराःधनमितिछेदः रा
दृश्ये गृहमेधिनोगृहस्थस्यप्रमोदंहर्षंसदैवनित्यमेवजनयति यदिधर्मश्चकामश्चैमौद्वौसंगतौभवेताम्
सदारशब्दस्यप्रथमावहुवचनेभ्रमः ५४ कस्मात्वंदुर्वलासीतिसारव्यस्तंपरिपृच्छति त्वयिसंनिहिते
तासुदद्यात्किंकथयोत्तरम् ५५ तिङ्वचनगुप्तं अन्योप्यर्थःस्फुटोयत्रमात्रादिच्युतकेष्वपि प्रतीयते शि॰व॰ ५३
विद्युत्तज्ज्ञास्तन्मात्राच्युतकादिकं ५६ यत्रयेषुमात्राच्युतकादिषुअपिमात्राविलोपेष्वपिसत्सु अन्योर्थो
पिस्फुटंप्रतीयते तज्ज्ञास्तन्मात्राच्युतकादिकंविदुः ५६ महाशयमतिस्वच्छंनीरंसंतापशांतये खला
वासादतिश्रांताःसमाश्रयतहेजनाः ५७ हेजनाःयूयंनीरंजलंपक्षे नीरमित्यत्रेकाक्षरंनिराकृत्यनरं

समाश्रयत किमर्थं संतापस्तृष्णाजालः पक्षे संसारजः तस्य शांतये निराकरणाय किंभूताय यूयं खला
वासात् क्षेत्रावासात् पक्षे दुर्जनावासादतिश्रांताः किंभूतं नीरं महाशयं पुनः किंभूतं अतिस्वच्छं नरस्या
पि विशेषणद्वयमेतत् मात्राच्युतकं ५७ तुषारधवल[illegible]र्जन्महामहामणिधरोनघः नागराजो
जयत्येष पृथिवीधरणाक्षमः ५८ मात्राच्युतकं एषः नागराजः शेषः पक्षे नकारस्याकारलोपे नगराजो
हिमालयो जयति किंभूतः तुषारधवलः पक्षे तुषारेण हिमेन धवलः पुनः किंभूतः स्फूर्जंती भास्वंती येम
हामणयस्तान् धारयतीति पुनरपि किंभूतः अनघः निरवद्यः पुनः किंभूतः धरण्याः पृथ्व्याः धारणे तत्र
क्षमः समर्थः विशेषणचतुष्कं द्वयोः शेषनागयोः ५८ सुश्यामा चंदनवती कांता तिलकभूषिता कस्ये
षानंगभूः प्रीतिं भुजंगस्य करोति न ५९ बिंदुच्युतकं एषा अनंगभूः कामभूः कांता स्त्री अर्थतो वेश्या
कस्य भुजंगस्य वेश्यापतेः प्रीतिं न करोति काक्वोक्तिः करोत्येव अनंगभूरित्यत्रानुस्वारविलोपो ऽपि
पक्षे एषा नगभूः पर्वतभूमिः कस्य भुजंगस्य सर्पस्य प्रीतिं न करोति किंभू० वेश्या सुतरां शोभना वा
श्यामा षोडशवार्षिकी पक्षे सुश्यामा अग्निहृष्टा सर्पाद्यन्वितत्वात् पुनः किंभूता चंदनवती चंदनो

वि॰सु॰टी
५४

पलिप्ता पक्षे चंदनवृक्षयुक्ता पक्षे कांता मनोहरा पुनः किंभूता तिलकभूषिता पक्षे तिलकैर्वृक्षैर्भूषिता
मंडिता ५९ यथा सत्प्रसवः स्निग्धः सन्मार्गविहितस्थितिः यथा सर्वाश्रयः सत्यमयं मे वकुलद्रुमः ६०
विंदुच्युतकं यथा सत्प्रभवः सुपुष्पः स्निग्धः संततछायः सन्मार्गे विहिता कृता स्थितिर्येन स तथोक्तः सर्वाश्र
यः अयं मे मम वकुलद्रुमो वर्तते पक्षे सत्यमयमेवेत्यत्र विंदोश्च्युतकात्सत्यं तथ्ये वायं पुरुषः वकुलद्रुमो व
र्तते वृक्षो वर्तत इत्यर्थः किंभूतः सत्प्रभवः सापत्यः पुनः किंभूतः प्रीतियुक्तः पुनः किंभूतः सन्मार्गविहितस्थि
तिः शास्त्रबोधितकारी पुनः किंभूतः सर्वेषामाश्रयः प्रतिपालक इत्यर्थः विंदुच्युतकं ६० मही[?]हावि
हंगानां मे ते मधुरैः कलापिनां विरुतैः स्वागतानीव नीवहाराय कुर्वते ६१ विसर्गच्युतकं महीरु
हा वृक्षा नीरवाहाय मेघाय स्वागतानीव कुर्वते कैर्विहंगानां पक्षिणां रुतैः शब्दैः किंभूतानां पक्षिणां मधु
रैः कलापिनां मधुरैरित्यत्र विसर्गच्युतकात् मधुरे कलापिनामिति भवति मधुरेऽस्मिन् एको मुख्यश्च ला
पः सुखवादो विद्यते येषां ते तेषां ६१ अगस्त्यस्य मुनेः शापाद् रूपसंदनमाश्रितः महासुखात्परि

शिव
५४

अघोनहुषःसर्पतांगतः ६१ ब्रह्मसदनंब्रह्मस्थितोनहुषोराजाअगस्त्यस्यमुनेःशापात्स्वर्गात्परिभ्र
ष्टःसन्सर्पतांगतःप्राप्तः महासुरित्यत्रविसर्गलोपः विसर्गच्युतकं ६२ महानपिसुधीरोपिवहुरत्नयु
तोपिसन् विरसःक्रूरपरीहारोनदीनःकेनसेव्यते ६३ अक्षरच्युतकं नदीनामिनोनदीनःसमुद्रः
पक्षेनकारच्युतकाद्दीनःस्वपरः ६४ सुशीलःस्वर्णगौरांगःपूर्णचंद्रनिभाननः सुगतःकस्यन
प्रीतिंतनोतिहृदिसंस्थितः ६५ सुगतोबुद्धःपक्षेगकारच्युतकात्सुतःपुत्रः अक्षरच्युतकम् ६५ त
नोतुतेयस्यफणीगरुत्मान्मारोमुरारेर्दयिताचशय्या नाभ्यांस्फुरन्मंदमशुभ्रदेहःपद्मागतिश्चन्न
मसोविरंचिः ६६ हरःक्षपीतापकरःसुरेशःशांतोहरिर्गोत्ररिपुर्विवस्वान् चंद्रोद्विजिह्वाश्रित
द्रत्युपेत्यलक्ष्माहतःपातुविधिर्जगंति ६७ स्थानच्युतकं सोसावशुभ्रदेहोमुरारिः श्रीवत्सस्तेतव
भद्रंतनोतु यस्यफणीशेषःशय्या यस्येत्यस्यसर्वत्रानुषंगः गरुत्मान्गरुडोगतिर्यानं यस्योहस्ते
चक्रंसुदर्शनाख्यं पद्मालक्ष्मीर्दयितायद्वल्लभा नाभ्यांविरंचिर्ब्रह्मास्फुरन् ६८ हरइति हरोमहेशो

वि॰मु॰टी॰
५५
55

द्विजिह्वाश्रितः चंद्रः क्षयी विवस्वान्सूर्यस्तापकरः सुरेशइंद्रो गोत्ररिपुः गोत्रशब्दोत्र पर्वतवाची वि
धिर्ब्रह्मा ध्रांतः इति तत्र तद्रूपत्वान्नुपेत्य ज्ञात्वा यस्मिं कविः लक्ष्म्या युतो हरिर्जगंति पातु रक्षतु इत्यर्थः इत्यु
पेक्षेतिपाठे इति हेतोस्तान्विहाय इत्यर्थः स्यान नमुत्तकंद्वाभ्यां युग्मं ६७ भिक्षवो रुचिराः सर्वे सुरसाः स
र्वजनप्रियाः क्षमायामभिसंपन्ना इत्यंपते मगाधेपूरं ६८ अंजननमुत्तकं भिक्षवः संन्यासिनः पक्षे भ
कारच्युतका दिक्षवः इक्षुदंडाः परं केवलं मगाधे इत्यंपते किंभूताः सर्वे रुचिराः पुनः किंभूताः सर्वे सुरसाः पुनः कीं ५
ल सर्वैजनप्रियाः पुनः कीदृशाः क्षमायां पृथ्व्यामभिसंपन्नाः ६९ सत्यशीलदयोपेतो दाताशुचिरम
त्सरः जिनः सर्वात्मना सेव्यः पदमुच्चैरभीप्सता ७० उच्चैः पदमभीप्सता वांछता पुरुषेण सर्वात्म
नाः समग्रयत्नेन जिनः सेव्यः पक्षे जकारच्युतकेन इनः स्वामी किंभूतः स्वामी दाता वदान्यः पुनः किंभू शिव
तः शुचिः शुद्धः पुनः किंभूतः अमत्सरः द्वेषरहितः अंजनच्युतकं ७० स्फोटयित्वाक्षरं किंचि ५५
त्पुनरन्यस्य दानतः यत्रापरो भवेदर्थश्च्युतदत्ताक्षरं हि तत् ७१ यत्र किंचिदक्षरं स्फोटयित्वा मत्री

हृस्व भंक्त्वा वा तत्स्थाने पुनरन्यस्याक्षरस्य दानेन तोऽपरो द्वितीयोऽर्थो भवेत् च्युतदत्ताक्षरं तदुच्यते हीसवधा
रो ७१ सदागतिहृतोच्छ्रायस्तमसो वश्यतां गतः अस्तमेष्यति दीनोऽयं विधुरे कः शिवः स्थितः ७२
दीपोऽयमस्तमेष्यति प्राप्स्यति अस्तमदर्शनमित्यमरः पक्षे दीपोऽयमित्यत्र मध्याक्षरं पकारं हृत्वा तत्पुन
स्तथैव नकारं दत्वा दीनोऽयमिति भवति एको विधुश्चंद्रः शिवे शंभौ स्थितः पक्षे विधुरे आपदि सत्यां कः
शिवः स्थितः सुखस्थितो भवतीत्यर्थः किंभूतो दीपः सदागतिना वायुना हृत उच्छ्रायो यस्य सः पुनः कथं
भूतः तमसोऽधकारस्य वश्यतां गतः दीनपक्षे तमसो दारिद्रस्य ७२ पूर्णचंद्रमुखी रम्या कामिनी
निर्मलांबरा तनोति कस्य नो स्वांतमेकांतमदनोत्सवं ७३ च्युतदत्ताक्षरजातिः कामिनी कस्य स्वांतं
चित्तमेकांतमदनोत्सवं नियतरूधं न करोति पक्षे कामिनीत्यत्र आद्याक्षरं हृत्वा तत्पुनस्तत्र यकारं द
त्वा यामिनी भवति रजनी यामिनी तमी इत्यमरः किंभूता कामिनी पूर्णचंद्रवन्मुखं यस्याः सा तथो
क्ता पक्षे पूर्णचंद्र एव मुखं यस्याः सा पुनः कीदृशी रम्या रमणीया पुनः कीदृशी निर्मलांबरा शुक्र

वि·मु·टी ५६

वस्त्रा पक्षे निर्मलगगना श्वेतांबरोऽग्निवाससीत्यमरः ॥ ७२ ॥ च्युतदत्ताक्षरजातिः ॥ ॥ ॥ इति
श्रीधर्मदासविरचिते विदग्धमुखमंडने चतुर्थः परिच्छेदः ॥ इति नानाविधिप्रश्नोत्तरजातिरूपं श्री
विदग्धमुखमंडनशास्त्रं समाप्तं ॥ टीका सुबोधिनी नाम विदग्धमुखमंडने त्रिलोचनकृता सम्या
वर्ततां विदुषां मुदे ॥ त्रिनंदांकमिते शाके वैशाखे कृष्णपक्षके ॥ लालादादनग
रेऽलिखितमस्मयत्नेन नमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शिव ५६